International Journal of Multidisciplinary Horizon

ISSN:**3049-2017**
IJMH 2024; 1(5): 25-27
© 2024 IJMH
www.themultijournal.com

Received: 13-12-2024
Accepted: 20-12-2024
Publish : 25-12-2024

**जया मनराल नेगी**
शोधच्छात्रा,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतवि-
श्वविद्यालय,नई दिल्ली

**Correspondence:**
**जया मनराल नेगी**
शोधच्छात्रा,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतवि-
श्वविद्यालय,नई दिल्ली

# रामानुजीयविशिष्टाद्वैतसिद्धान्तविमर्शः

**जया मनराल नेगी**

**शोध सार**

विशिष्टाद्वैतम् 11-12 शताब्द्याः दक्षिणात्यभारतीयधर्मशास्त्रिणा दार्शनिकेन च रामानुजाचार्येण प्रतिपादितं दर्शनं वर्तते यत्तु अद्वैतवेदान्तस्य कठोरादैतवादस्यैकं सम्मोहकं विकल्पं प्रददाति। विशिष्टाद्वैतः ब्रह्मणि वास्तविकतायाश्च मौलिकैकतायाश्च बलं प्रददाति।

वेदान्तदर्शनस्य सम्प्रदायेषु 'विशिष्टाद्वैतवेदान्तोऽस्ति' एकः सम्प्रदायः। सम्प्रदायस्याऽस्य प्रवर्तकोऽस्ति 'श्री रामानुजाचार्यः। विशिष्टाद्वैतवेदान्तस्य 'नामकरण' रामानुजाचार्यः न कतमस्ति तथापि रामानुजेन वेदान्तस्य 'ब्रह्मसूत्रस्य' 'श्रीभाष्ये' निर्दिष्टमेतत् - यथा - "प्रकारद्वयविशिष्टैवस्तु"[1]

विशिष्टश्च विशिष्टश्चविशिष्टे, तयोरद्वैतं विशिष्टाद्वैतमिति ।

**विशिष्टाद्वैतशब्दस्य निर्वचनम्-**

द्वयोर्भावो द्विता। द्विशब्दाद 'भावे' तल् प्रत्ययो भूत्वा द्वैतम्। तदनन्तरं 'स्वार्थे' अण् प्रत्ययो भूत्वा 'न द्वैतमिति' अद्वैतम्, विशिष्टस्याद्वैतम् (विशिष्टाद्वैतम्)।

**ब्रह्मकमेवाऽस्ति 'तत्त्वम्' तद्यथा-**

अशेषचिदचित्प्रकारं ब्रह्मकमेव 'तत्त्वम्' तत्र प्रकारप्रकारिणोः प्रकारणाञ्च मिथोऽत्यन्तभेदेऽपि विशिष्टैक्यादि विवक्षायैकत्वव्यपदेशः। तदितरनिषेधश्च।"[2]

अयं सिद्धान्तः 'चिद्-अचिदीश्वरश्चेति त्रयाणां तत्त्वानां सिद्धान्तसम्मतम् अस्ति। चिद् जीवः प्रकृतिश्चाऽस्ति।

**ईश्वरस्तु** - ब्रह्मन्नारायणादि शब्दवाच्यः 'पुरुषोत्तमः।'

**रामानुजाचार्यस्य परिचयः-**

श्री रामानुजाचार्यस्य जन्म द्रविडदेशान्तर्गते भद्रपुर्याः 'श्रीमन्महाभूतपुरी' नाम्नि अग्रहारे दशतमे शतके गुरुवासरे आर्द्रनक्षत्रे शेषांराजत्वेन अभवत्। श्री रामानुजाचार्यो 'यामुनाचार्यस्य' प्रधानशिष्यो वर्तते। श्री रामानुजाचार्यः 'लक्ष्मणः' इति नाम्ना अपि ज्ञायते। अस्य पितुर्नाम 'केशवः'। अयं विशिष्टाद्वैत सम्प्रदायः 'श्री सम्प्रदायः' इति नाम्नाऽपि प्रसिद्धोऽस्ति ।

रामानुजाचार्यस्य 'वेदार्थसंग्रहो' ग्रन्थोऽस्ति। ग्रन्थेऽस्मिन् 'विशिष्टाद्वैतवेदान्त-मतानुयायीनां नामानि समुपलभ्यन्ते। तेषु बोधायनः, टङ्क, गुहदेवः, कपर्दिः द्रामिडः, भारुचिश्चेति प्रमुखाचार्याः।

**विशिष्टाद्वैतदर्शनस्य ग्रन्थाः**

1. न्यायतत्त्वम् नाथमुनिः
2. योगरहस्यम् नाथमुनिः
3. आगमप्रमाण्यम् यामुनाचार्यः

4. महापुरुषनिर्णयः यामुनाचार्यः
5. सिद्धित्रयम् यामुनाचार्यः
6. गीतार्थसंग्रहः यामुनाचार्यः
7. चतुःश्लोकी यामुनाचार्यः
8. स्तोत्ररत्नम् यामुनाचार्यः
9. मायावादखण्डनम् यामुनाचार्यः
10. श्रीभाष्यम् रामानुजाचार्यः

**विषयवस्तु**

यस्मिन् सिद्धान्ते चेतनाजीवात्मनः अचेतनाजडजगन्ति च प्रलयावस्थायां सूक्ष्मकारेण विलीनः आसन्, सृष्टिकाले च पुनस्तस्मादग्नेः स्फुलिङ्गनि सृतवते तस्मान्निः सृत्य तस्मिन्नेव ब्रह्मणि स्थूलावस्थया तिष्ठन्ति तत्तद्विशेषणांशेन भेदविशिष्टयोस्तयोर्ब्रह्मणोरेकत्वं सिद्धान्तितमभूत्तादृशस्सिद्धान्त एव "विशिष्टाद्वैत-सिद्धान्त' इत्युच्यते ।"[3]

**रामानुजाचार्यस्य मते -**

'ब्रह्म' - सगुणब्रह्मेश्वरः स्थूलं चित्, स्थूलमचित्, विशिष्टं ब्रह्मसूक्ष्मं चित्, सूक्ष्मं चाचिद् विशिष्टं 'ब्रह्म' इत्याख्यया अभिहितो भवतीति। अधुना विशिष्टाद्वैतस्य प्रमुखान् सिद्धान्तान् प्रस्तौमि ।

**सृष्टिस्वरूपविमर्शः-**

गुणत्रयावयात् प्रधानात् सत्वादिगुणोन्मेषभेदेन सात्विको, राजसः, तामसश्चेति त्रिधा महानुत्पद्यते। त्रिविधान्महतः तथैव त्रिविधः अहंकार। तत्र सात्विकाहङ्कारस्यवैकारिक इति, तामसाहङ्कारास्य भूतादिरिति च नामान्तरम्। तत्र सात्विकाहङ्कारात् एकादशेन्द्रियाणि जायन्ते।

तामसाहङ्कारात् शब्दतन्मात्रमुत्पद्यते। तत्र आकाशः। आकाशात् स्पर्शतन्मात्रा ततो वायुः। तस्माद्रूपतन्मात्रं, ततस्तेजः तस्मात् रसतन्मात्रं तस्मादापः अद्भ्यो गन्धतन्मात्रं तस्मात्पृथिवीति ।

**मोक्षस्वरूपनिरूपणम् -**

अथ वेदान्तशास्त्रे प्रधानतया प्रतिपाद्यं मोक्षस्वरूपमधिकृत्य विचार्यते। सर्वैरपि दार्शनिकैः मोक्षपदार्थः अंगीक्रियते परं तु प्रतिदर्शनं भिन्नभिन्नरीत्या तत्र तत्र मोक्षस्वरूपं निरूपितम्। इह ग्रन्थगौरवभिया रामानुजाचार्याणां मते मोक्षः कः। के च तत्र विशेषा इत्येतावन्मात्रं प्रस्तूयते। श्रीभाष्य अत्रधिकरणे "त्रय्यन्तनिष्णातास्तु निखिलवजगदेककारणस्य अशेषहेयप्रत्यनीकानन्त ज्ञानानद्वैकस्वरूपस्य स्वाभाविकानवधिकाति शयासंख्येय कल्याणगुणाकरस्य सकलेतरविलक्षणस्य सर्वात्मभूतस्य परब्रह्मणश्शरीरतया प्रकार भूतस्य अनुकूलापरिच्छिन्नज्ञानस्वरूपस्य परमात्मानुभवैकरसस्य जीवस्यानादि कर्मरूपाविद्यातिरोहितस्वरूपस्य अविद्योच्छेदपूर्वकंस्वभाविकरपरमात्मानुभवो मोक्ष इति विशिष्टाद्वैतवेदान्तभिमतमोक्षस्वरूपमुपवर्णयामा सुः श्रीमद्भगवद्रामा नुजाचार्यः।

उपदर्शितवाक्यसमुदायेन नामपहृतपात्मत्वादिस्वरूपाविर्भावपूर्वक परिपूर्ण पूर्ण ब्रह्मानुभवो मोक्ष इति फलिताथा भवति।

उक्तार्थे कतिपयशङ्कासमाधानम् मोक्षे विष्णुरोषाः जीवाः भगवत्कैङ्कर्ये-कनिरता इत्येवं भवद्भिरभ्युपगमात कैङ्कर्यस्य मानसवाचिक कायिकरूपत्रिविध सेवारूपतया सेवायाश्चं लोके दुःखोत्पादं कत्वेनैव दर्शनात् मुक्तानाम सेवाकाले निरातशयसुश्वानन्दमयपरिपूर्णब्रह्मानुभवस्य परमात्मसेवा दुःखकरी सेवात्वात् स्वामिभृत्यसेवादित्यनुमानेन बाधितत्वात् तस्य मोक्षरूपत्वं न संभवतीति चेत् अव ब्रूमः।

"रसौ वै सः" रसं ह्येवायं लब्धाऽनन्दी भवति "आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभित्यज्यते" निरस्तातिशयाह्लाद सुखभावैक लक्षणं भेषजं भगवत्प्राप्तिः एकान्तात्यन्तिको मता" इत्यादिश्रुतिस्मृतिभिः बैकुण्ठे भगवत्स्वरूपस्य तत्सेवायाश्च आनन्दरूपत्वेनैव प्रतिपादनात् तादृशधर्मिग्राहक श्रुत्यादुःखकृत्यरूप साध्यस्य बाधः।

एवं परमात्मसेवादुःखकरोत्याद्यनुमाने पापघटितत्वमुपाधिः संसार्यवस्थायां जीवकृतसेवायाः दुःखकृत्वे पापघटितस्यैव प्रयोजकतया मुक्तावस्थायां विधूतपापत्वेन तत्कालीनपरमात्मसेवायाः न दुःखकारित्वम् ।

अतोऽत्र पक्षभूतपरमात्मसेवायाम् सेवात्वस्य सत्वेऽपि पापघटितत्वरूपोपाधे-रसत्वेन साधनाऽव्यापकत्वं बद्धावस्थाजीवसेवायां साध्यव्यापकत्वं चोपाधेरक्षुण्ण- मिति सोपाधिकत्वादपि नोपदर्शितानुमानेन दुःखकृत्वं साधयितुं शक्यते।

**अवेदमनुसन्धेयम् -**

लोके पुंसा प्रवृत्तिः आत्माभिमानानुगुणपुरुषार्थमुद्दिश्यैव दृश्यते। तत्र देहात्माभिमानिनां देहपोषणादौ प्रवृत्तिः।

पशु-पक्षी-नर-सुराणां स्वदेहभिमानानुगुणम् आहारादौ प्रवृत्तिः। देहातिरिक्तात्मविवेके सति ऐहिकं विहाय यथारुचि स्वर्गादौप्रवत्तिः तथा विष्णुशेषत्वमेव स्वरूपमिति विवेके पत्ल्याः पतिपरिचर्यायामिव विष्णुपरिचर्यायामेव सति पतिशेषत्वविवेकिन्याः प्रवृत्तिरुत्साहपूर्विका भवतीति भगवत्परिचर्यायाः सुखस्वरूपत्वं युज्यत इति भगवत्कैङ्कङ्कर्यर्वक परिपूर्णब्रह्मानुभवस्य मोक्षत्वं सिद्धयति ।

**परिपूर्णब्रह्मानुभवस्य दुःखमिश्रितत्वशंकानिरासः**

ननु मुक्तस्य सर्वज्ञत्वेन दुःखविषयकबुद्धेरपि सत्वाद् तस्यापि दुःखित्वापत्तिः बद्धस्यापि विषयविशेषसंदर्शने दुःखदर्शनेन अबुद्धिः पूर्वकदुःखोत्पत्यसंभवात्।

न चानुकूलसुखमात्रविषया मुक्ताधीरिति युक्तं तथा सति मुक्तावस्थायां "सर्व ह पश्यः पश्यती" त्यादिश्रुते अनुकूलसुखभावदर्शन विषयकत्वेन संकोचात्तेः।

अतो मुक्तस्य सर्वज्ञत्वेन दुःखविषयकबुद्धिसत्वे दुःखित्वापत्या मोक्षे दुःखमिश्रित एव ब्रह्मानुभव इति चेन्न। सर्वस्यापि जगतः भग-

वच्छरीरत्वेन भगवद्विभूतितया आनुकूल्यमेव जीवस्य स्वाभाविकं रूपम्।

इयाँस्तु विशेषः। प्रकृतौ तत्तज्जन्मनि प्रतिकूलतया भातस्याऽपि वस्तुजातस्य आनुकूल्यमेव (सुखरूप) जीवस्य स्वाभाविकं परं तु बद्धा-वस्थायां संसारजनकपापेन जीवज्ञानस्य संकुचितया प्रतिबन्धक-वशात् स्वतः प्राप्तस्यापि आनुकूल्यस्यप्रकाशो न भवति मोक्षावस्थायां तु प्रतिबन्धकनिवृत्या पूर्वमव्यक्तमपि आनुकूल्यं प्रकाशं भजतीति।

एवञ्च मुक्तस्य सर्वज्ञत्वेऽपि सर्वस्यापि भगवद्विभूतितयासुखत्वेनैव भावान्न दुःखित्वमिति न परिपूर्णब्रह्मानुभव रूपमोक्षस्य दुःखमिश्रित-त्वमिति ।

न चेदानीमनुकूलतया ज्ञातेऽपि पूर्वमिदं प्रतिकूलमासीदिति ज्ञान-विषयत्वेन दुःखित्वापत्तिरिति वाच्यम्।

मोक्षकाले वस्तुतो दुःखानुभवस्याविद्यमानतया प्राचीनकाले (संसारकाले) "अहं दुःखी आसम्।"

इत्येवं विषयकज्ञानेन (स्मरणेन) कस्यापि दुःखित्वानुपपत्तेः तथा अनुभवादर्शनात् न हि प्राप्ताभिषेकं प्राचीनकाराग्रहवासधीः दुःखा-करोति।

तस्मात् प्राचीनकाले प्रातिकूलयज्ञानस्य स्वकर्मोपाधिकृत भगवन्नि ग्रहैकप्रयुक्ततया मोक्षदशायां तादृशोपाधेरभावेन सर्वस्याप्यनुकूलतयैव भानात् न परिपूर्णब्रह्मानुभव रूपमोक्षस्य दुःखमिश्रितत्वमितिभावः।

**नित्यसूरिसिद्धिः**

अथ मुक्तव्यतिरिक्ताः नित्यसूरिणः बन्धप्रयोजककर्माऽभावात् सर्वदा (अनादितः एव) भगवदनुभवं कुर्वन्तीति प्रस्तूयते।

**"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः"** इति श्रुत्या सदादर्शनस्य प्रतिपादनात् मुक्तव्यतिरिक्तो नित्यसूरिसिद्धः। यद्यपि मोक्षप्राप्त्यनन्तरं मुक्तानां भगवद्दर्शनं सदाभवत्येव तथापि नित्यसूरिणां यदा कदापि संसारबन्धस्याऽसत्वेन सर्वकालावच्छेदेन यथा दृष्टत्वं तथा मुक्तानां न संभवति संसायवस्थायां भगवदर्शनाभावात्।

किञ्च बद्धजीवानामेव कालविषेषे मुक्तत्वात् क्रमेण एकैशेष एव भगवद्दर्शनसंभवेन नित्यसूरिपदवाच्यान्तरगरुडादिवत युगपत सर्वेषां दर्शनाभावेन च न सदा दर्शनं युज्यते। अतो मुक्तव्यतिरिक्ताः नित्यसूरिण एव सदा पश्यन्तीति मुक्तव्यतिरिक्त नित्य सूरिसिद्धर्नि-ष्प्रत्यूहैव ।

न च नित्यसूरीणां अनादिशुद्धत्वात् तेषां मुक्तानां च मोक्षे ब्रह्मा-नुभवविषये तारतम्यापत्तिरिति वाच्यम्। उभयोरपि पारतन्त्र्यलक्षण-भगवच्छेषत्वस्य तुल्यतया ब्रह्मानुभवेतारतम्यानुपपत्तेः।

**तथा च सूत्रितम् "भागमात्रसाम्यलिङ्गाच्चेति।"**

सायुज्यस्यैव मोक्षपदवाच्यत्वं अथ परिपूर्णब्रह्मानुभवस्य मोक्षत्वेन मुक्तानां नित्यसूरिणां च भोगे (तदाशानुभवे) तारतम्यं नास्तीति यदवादि तन्न घटते। तथा हि "एतासामेव देवतानाम् सायुज्यं साटितां समानलोकतामाप्नोति" इत्युपनिषदि तथा भागवते

**"लोकेषु विष्णोर्निवसन्ति केचित् समीपमृच्छत्तिचकेचिदन्ये।**
**अन्ये तु रूपं सदृशंभजन्ते सायुष्यमन्ये स तु मोक्ष उक्तः ॥**

इति ग्रन्थेन सायुज्य सालोक्य सामीप्यसारूप्यादिभेदेन मोक्षस्य चतुर्विधत्वं प्रतिपादनात् अग्निहोत्र-दर्शनपूर्णमासादिसाधनविशेषभेदेन तत्साध्यस्वर्गादिफले तारतम्यवत् चतुर्विधेष्वपिमोक्षेषु तारतम्यस्यापि आवश्यकतया परिपूर्णब्रह्मानुभवस्य एकस्यैव मोक्षवचवाच्यत्वं तत्र च (भोगे) तारतम्याभावश्च न संगच्छते।

अतश्च मोक्षे भोगे च वैषम्यापत्तिरिति चेत् अत्रोच्यते। सायुज्यस्यैव मुख्यवृत्या मोक्षपदवाच्यत्वेन सालोक्यादौ मोक्षव्यवहारस्य गौण-त्वाच्चनात्र मोक्षेभेदः ।

अयमाशयः सालोक्य-समीप्य सारूप्याणां सायुष्यरूपमोक्ष एवान्त-र्भूतत्वात् न मुख्यवृत्या मोक्षपदवाच्यत्वम्। तत्र सालोक्यं नाम समाजलोकवृत्तित्वं अर्थात् नित्यसूरिणां मुक्तानां च वैकुण्ठात्मकै-कलोकवृत्तित्वं । एवं समानरूपत्वमेव सारूप्यं समानत्वञ्च भगवद्रूपेण सह बोध्यम्।

**उपसंहारः**

विशिष्टाद्वैतम् 11-12 शताब्द्याः दक्षिणात्यभारतीयधर्मशास्त्रिणा दार्शनिकेन च रामानुजाचार्येण प्रतिपादितं दर्शनं वर्तते यत्तु अद्वैत-वेदान्तस्य कठोरादैतवादस्यैकं सम्मोहकं विकल्पं प्रददाति। विशि-ष्टाद्वैतः ब्रह्मणि वास्तविकतायाश्च मौलिकैकतायाश्च बलं प्रददाति। परञ्चैवमपि प्रतिपादयति यत् ब्रह्म भेदरहितन्नास्ति। अपि तु अस्मिन् दर्शने ब्रह्म जटिलजैविकसम्पूर्णतायाः रूपे मन्यते यत्तु चिदा-चिदोभयविधं वर्तते इमे न ब्रह्मणः पृथक् अपितु अस्य अविभाज्य गुणे प्रकारे वा स्तः ये अस्य स्वरूपं निर्मातः।

विशिष्टद्वैतस्य केन्द्रे ब्रह्मणः आत्मनां भौतिकसंसारस्य च मध्ये सम्बन्धस्यावबोधोऽस्ति यस्तु आत्मशरीरयोर्मिथः सम्बन्धानुरूपोऽस्ति। यथा शरीरं पूर्णतया आत्मनि निर्भरमधीनस्थश्चास्ति तथैव चिदचिच्च पूर्णतया ब्रह्मणि निर्भरेऽधीनस्थे च स्तः।

रामानुजः शङ्करस्य निराकारनिर्गुणब्रह्मणः मायासिद्धान्तस्य च आलोचनां करोति यस्तु संसारं मिथ्या मन्यते। शङ्करस्यादैतस्य विपरीतं विशिष्टाद्वैतं कथयति यत् ब्रह्म सगुणमस्ति यत्तु ज्ञानानन्दश-क्तिकरूणादृशानन्तशुभगुणैः सम्पन्नमस्ति। संसारः आत्मानश्च ब्रह्मणः शक्तेः महिम्नश्च वास्तविकाभिव्यक्तयः सन्ति न तु भ्रमः।

विशिष्टाद्वैते मोक्षमार्गः मुख्यतया विष्णुभक्तिर्वर्तते यः परब्रह्मरूपे ज्ञायते। ज्ञानकर्मणी भक्तिसहायके मन्येते ये मनः शुद्धं कृत्वा भगवन्तं प्रति प्रेम विकासयन्ते। सद्भक्त्या शरणागत्या च आत्मा ब्रह्मणा सह साम्यं प्राप्नोति अयमेव मोक्षः।

निष्कर्षतः विशिष्टाद्वैतः परिष्कृतधर्मिकं दार्शनिकञ्च कलेवरं प्रस्तौति यस्तु एकतान्तरयोः अवधारणे सामञ्जस्यपूर्णं करोति। वास्तविकैः विशिष्टगुणैः च योग्यजैविकसम्पूर्णरूपे ब्रह्म कल्पयित्वा रामानुजः वास्तविकतायाः आस्तिकतावबोधाय सर्वोच्चं प्रति प्रेमभक्तिकेन्द्रित-मोक्षमार्गाय च दृढमाध्यात्मिकाधारमेकं प्रददाति।

**पाद टिप्पणी –**

1. श्रीभाष्यम् पृ. 224

2. न्यायसिद्धांजनम्, पतिज्ञावाक्यम्

3. माधवाचार्यः संवदर्शनसंग्रहे